# पञ्चमोऽध्यायः

(क) श्रीमद्भागवते काव्यतत्त्वानां विश्लेषणम्

श्रीमद्भागवतं वेदस्वरूपकल्पवृक्षस्य विगलितफलं वर्तते । यथा रामायणं आदिकाव्यमस्ति तथैव श्रीमदद्भागवतं सहृदयानां भक्तजनानां आध्यात्मिकजनानां सर्वजनानाञ्च पथप्रदर्शकं महनीयं महाकाव्यं विद्यते । अनेन कारणेन अस्य महापुराणस्य रसालयं इति संज्ञा प्रसिद्धा वर्तते । अत्र श्रीमद्भागवते काव्यतत्त्वानां विश्लेषणमिति अधिकृत्य काव्यतत्त्वमाधारीकृत्य काव्यरहस्यानां काव्यसौन्दर्यस्य च प्रकाशनं क्रियते । आलोच्यग्रन्थे विवेचितं ज्ञानं भक्तिं च अधीत्य श्रीमद्भागवतस्य काव्यतत्त्वसौन्दर्यस्यापि अध्ययनं कर्तव्यम् । प्रकृतग्रन्थाधारेण यत् साहित्यिकसामग्रीं प्राप्यते । तेषां विवेचनं अन्याध्याये लिखितम् । अत्र काव्यतत्त्वानां विश्लेषणमेव आवश्यकम् –

१. काव्यस्य आत्मा रसः इति उक्त्याधारेण रससंयोजन–विश्लेषणम् ।

२. गुणदोष–विश्लेषणम् ।

३. अलङ्कारसंयोजनम् ।

४.छन्दसंयोजनविश्लेषणम् भाषा सौन्दर्यञ्च चित्रणं विधीयते ।

तैत्तिरीयोपनिषदि "रसो वै सः" इत्याधारेण नाव्यशास्त्ररचनाकारेण –

न हि रसादृते कश्चिदप्यर्थ प्रवर्तते । [1]

इति स्वीकृतः । रसः अलौकिकः, चमत्कारपूर्णः, आनन्दविशेषाधायको भवति । अयमेव आनन्दः काव्यस्य उपादेयता सिद्धयति । काव्ये चमत्कारः एव रसस्य

[1] नाव्यशास्त्रे ३०/३१

प्राणः वर्तते । अत्र चमत्कारस्य कोऽर्थः? चित्तस्य विस्तारः, विस्मयापरपर्यायः भरतमुनिना रसस्य तुलना कुर्वन् लिख्यते –

यथा नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिः

तथा नानाभावोपगमाद्रसनिष्पत्तिः ।

यथा गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधीभिश्च

षड्रसा निवर्त्यन्ते एवं ननाभावोपहिता

अपि स्थायिनो भावा रसत्वमाप्नुवन्ति ।[१]

रससंयोजनविश्लेषणम्

अत्र श्रीमद्भागवते यदा रसविषयकमध्ययनं विश्लेषणं च क्रियते तदा एतत्पूर्वं इदमपि ध्यातव्यं यत् –

रसः न ज्ञाप्यः न कार्यं न साक्षादनुभवः न परोक्षज्ञानं

न निर्विकल्पकं ज्ञानं न सविकल्पकं ज्ञानमिति ।

अस्य रसानन्दस्य प्राणस्वरूपः आनन्दः अनया अनुभूत्या एव काव्यानन्दं ब्रह्मानन्दसहोदरः इति प्रयुक्तः ।

श्रीमद्भागवते रसस्य यत्र वर्णनं प्राप्यते अनुभूयते वा तत्र काव्यात्मदृष्ट्या लौकिकरसस्यैव ग्रहणं भवति । वस्तुतः श्रीमद्भागवतस्य रसदृष्ट्या विश्लेषणं अतिगभीरं वर्तते । रसभावयोजनायाः अत्र महद्मूल्यं वर्तते । यथा–कथानकेषु कामविकारसर्वजनसुलभः रसः हृद्यावर्जकः अतिस्वाभाविकः अतिकमनीयः, अतिलोकप्रियश्च वर्तते । परञ्च अलौकिकसंयोगशृङ्गारान्तर्गते गोपाङ्गनानां भावना, अनुभावविभावादिसंयुक्तम् आलिङ्गनादिक्रीडा परमोज्वला प्रेमभावना च उद्भाव्यते ।

---

[1] नाट्यशास्त्रे पृ. ७१

अत्र कृष्णः आश्रयः, आलम्बनं गोपिका, स्थायिभावाः भगवद्रतिः, उद्दीपनञ्च यमुनातटं, प्रेमाश्रुपूर्णवार्तालापः आलिङ्गनश्वेदकम्पादयः, भ्रूभङ्गादयश्च सञ्चारिभावः, हर्षचपलताक्रीडागर्वादयः एतानि सर्वाणि अलौकिकानन्दरसानुभूतिकारणानि सन्ति, यथात्र शृङ्गारविश्लेषणं प्रस्तुतं तथैव सर्वरसानां विश्लेषणं कर्तुं शक्यते ।

श्रीमद्भागवते प्रायेण आधुनिकदृष्ट्या भक्तिरसस्यैव प्राधान्यं स्वीक्रियते । काव्यकारैः अयं रसः नापृथगालोचनीयः अपितु शान्तरसस्यान्तर्गतैव अस्य भक्तिरसस्य समाविष्टः कृतः । सर्वैः इदं मन्यते श्रीमद्भागवते महाभारते रामायणे च भक्तिरसः प्रधानरूपः । अनेन कारणेन हिन्दी साहित्ये लौकिकसाहित्यरचनानाञ्च भक्तिविषयकरचनासु श्रीमद्भागवतं आधारभूमिः स्वीकृतेति ।

२. गुणदोषविश्लेषणम्

काव्यालङ्कारसूत्रवृत्तौ “काव्यशोभायाः कर्तारो धर्माः गुणाः” इति निगदितः । एतत्पूर्वं भरतमुनिना एव विपर्यस्ताः गुणकाव्येषु कीर्तिताः इति निर्दिष्टाः । अस्यार्थः दोषाणां विपर्ययाः ये सन्ति ते गुणाः भवन्ति । अत एव निर्दुष्टत्वं गुणसमन्वितं काव्यं भवति । गुणदोषादीनां विवेचनं पूर्वोक्ताध्याये वर्णितम् । अत्र किञ्चित् विश्लेषणं क्रियते ।

को नाम दोषः? ये रसापकर्षकाः सन्ति ते पुनः पञ्चधा स्मृताः । तथैव के गुणाः ? ये उत्कर्षधायकाः सन्ति । श्रीमद्भागवते गुणदोषविश्लेषणं यदा क्रियते तत्र प्राधान्येन गुणत्रयाणां उदाहरणानि समागतानि । किन्त्वत्र श्रीमद्भागवते वर्णविन्यासदृष्ट्या ओजगुणस्य द्योतनं सर्वत्र उपलभ्यते । दण्डिस्वीकृताः ये गुणाः

सन्ति । तेषां निदर्शनं श्रीमद्भागवतस्य दशमस्कन्धे प्राप्यते । तत्र श्लेष–लालित्य–सुकुमार–प्रसाद–सौभाग्य–उदारता–कान्ति–समाधि–ओज–माधुर्यादीनां बहूनि उदाहरणानि प्रसिद्धानि सन्ति ।

काव्यप्रकाशकारेण यद्गुणत्रयं स्वीकृतं तदेवात्र व्यासस्वीकृतगुणानां विश्लेषणं सम्भवम् । तत्र भगवतः कृष्णस्य स्तुतिपरकानि उदाहरणानि सन्ति –

नतोऽस्म्यहं त्वाखिलहेतुहेतुं
नारायणं पूरुषमाद्यमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद्–
ब्रह्माऽऽविरासीद् यत एष लोकः ॥[1]

अत्र भगवतः नारायणस्य स्वरूपं अविनाशी समस्तकारणानां कारणं स्वीकृतम् । अत्र वैशिष्ट्यमिदं अस्ति यत् दृश्यमानसमस्तजगतः कारणं नारायणः एव । अत्र पञ्चमहाभूतानां इन्द्रियाणां विषयाणां व्यवहारः कारणस्वरूपः नारायणः । माधुर्यगुणस्य सूक्ष्मं वर्णनं बृहदाकारस्वरूपेण अवस्थितमत्र ।

भरतमुनितः आरभ्य पण्डितराजजगन्नाथपर्यन्तं यैः काव्यशास्त्रिभिः ये गुणाः स्वीकृताः तद्गुणानां व्यवहारः प्रयोगः समुपयोगश्च अभिव्यञ्जनया श्रीमद्भागवते प्राप्यते ।

## अलङ्कारसंयोजनम्

यथोक्तं पूर्वं काव्यस्य पक्षद्वयं वर्तते कलापक्षः भावपक्षश्च । अनयोः पक्षयोः अन्योन्याश्रयसम्बंद्धः वर्तते । अन्वयव्यतिरेकीभ्यां एकस्याभावे अन्यस्यस्थितिः असम्भवः तथैव कलापक्षे अलङ्काराणां महत्त्वं वर्तते । अलङ्कारैः

---

[1] श्रीमद्भागवते. १०/४०/१

काव्ये प्राभावोत्पादकता सम्भवति । श्रीमद्भागवते अनायासेन सहजभावेन सौन्दर्यविद्यापरकानां  अलङ्काराणां संयोजना सञ्जाता । अस्मिन् महापुराणे अलङ्कारयोजनया स्पष्टभावावबोधनं, शोभाविधानं, रसोपकरणं, सौन्दर्योत्पादनं च दृश्यते । शब्दार्थस्य वक्रता विचित्रता एवं श्रीमद्भागवतस्य अलंकारवैशिष्ट्यं कठोरवर्णानां माधुर्यपूर्णवर्णनं, कोमलकान्तिपदावली रससंसिक्तवर्णानां तथा प्रसङ्गानुसारेण शब्दानां संयोजनं अलङ्कारदृष्ट्या प्रतीतिर्भवति । पृथक्पृथक् अलङ्काराणां उदाहरणानि चतुर्थेऽध्याये संयोजितानि । तद्यत्र विश्लेषणदृष्ट्या अलङ्काराणां वैशिष्ट्यं निगदितम् ।

छन्दोविश्लेषणम्

"छन्दो विचितिः" इत्याधारेण काव्यस्य निर्माणे छन्दसां महत्त्वं सुस्पष्टम् । यस्य कस्यापि काव्यस्य महाकाव्यस्य वा छन्दयोजनाधारेण तस्य उत्कृष्टं स्वरूपं महत्त्वपूर्णं स्थानं च भवति । भागवतकारेण दशमस्कन्धे छन्दसां प्रयोगे विशेषेण ध्यानाकर्षणं कृतम् । श्रीमद्भागवते त्रिंशदधिकानि छन्दांसि प्रयुक्तानि जातानि । अत्र विश्लेषणं क्रियते ।

महर्षिव्यासेन केन कारणेन कियच्छन्दसां प्रयोगः कृतः तदत्र उपस्थाप्यते । संकृतसाहित्ये अनुष्टुप्छन्दः लोकप्रियं वर्तते कथानके भावाभिव्यक्तौ च प्रायेण अस्य प्रयोगः क्रियते । आदिकविवाल्मीकिनापि कथाविस्तारे अस्य प्रयोगः कृतः तथैव व्यासेनापि स्वीकृतः ।

युद्धसमये, सभासंवादसमये, गोष्ठीसंवादसमये, कथावस्तु–उपस्थापने च वंशस्थछन्दः प्रयुक्तम् ।

करुणरसस्य अभिव्यक्तौ वैतालीयछन्दः उपयुक्तं भवति तत्प्रयोगः व्यासेन कृतः । औचित्यदृष्ट्यापि वैतालीयछन्दः ग्राह्यं भवति । यस्य कार्यस्य साफल्यं चित्रणं क्रियते तत्र मालिनी छन्दसः प्रयोगः भवति प्रायेण सर्गान्तेऽपि क्रियते । एतस्यापि उदाहरणं श्रीमद्भागवते प्राप्यते ।

महाकाव्येषु द्रुतविलम्बितछन्दप्रयोगः निम्नाङ्कितेषु विषयवर्णनेषु महाकविभिः कृतः । शृङ्गारवर्णने, विलासवर्णने, सुखसमृद्धिवर्णने, मृदुलभावनावर्णने मधुरसंवादादिवर्णने चेति ।

श्रीमद्भागवते अनेकप्रकारेणैव छन्दसां विश्लेषणं दृश्यते । अन्येषामपि छन्दसां विषये भागवतकारेण वर्णनं गृहीतम् । यथा–वसन्ततिलकाप्रियं छन्दः वर्तते । अस्य प्रयोगः ऋतुवर्णने सरोवरवर्णने च प्रयुक्तं भवति भागवते । श्रीमद्भागवते एतादृशानि अनेकानि काव्यतत्त्वानि गूढरूपेण संग्रथितानि ग्रन्थकारेण ।

इदं महापुराणं एतादृशं ग्रन्थरत्नं वर्तते यत्र भक्तिज्ञानविविधदार्शनिक सिद्धान्तानां लक्षणग्रन्थः अस्ति । अस्मिन् महापुराणे सप्तप्रकारकाणि काव्यरूपाणि ग्रथितानि । सप्तप्रकारकेषु काव्यरूपेषु रूपद्वयं परिभाव्यते ।

१. इतिवृत्तात्मकम्, २. वर्णनभावात्मकञ्च ।

अनयोः स्वरूपयोः परस्परं मिश्रितं रूपमपि विद्यते । एतयोः विश्लेषणं अशक्यमेव तथापि गद्यात्मकं आख्यानात्मकं स्तुत्यात्ममुपदेशात्मकं संदेशात्मकं भावात्मकं च काव्येऽस्मिन् दृश्यते ।

उपरिलिखितसर्वेषां काव्यविधानां उदाहरणानि सन्त्येव अत्र नापृथगालोचनीयानि ।

(ख) श्रीमद्भागवते काव्यतत्त्वानां समीक्षणम्

संस्कृतवाङ्मये काव्यस्य अन्यतमं स्थानं वर्तते । यतोहि शास्त्राद्युपदेशात् सहजसुबोधं सरलं सुगम्यं रसमयं अनुभूतिपरकं त्वरितानन्ददायकं काव्यं भवति । काव्येष्वपि रामायणपुराणाधारितानि काव्यानि सुखकरं बोधोत्पादकं च भवति । एतादृशेषु काव्येषु कथैव प्रधानत्वेन वरीवर्ति । कथानां विविधघटनासु मानवजीवनस्य आरोहावरोहचरितं सुस्पष्टं भवति । अनेन कारणेन पुराणाश्रितकाव्यानां लोकोत्तरं आनन्दजनकं हृद्यावर्जकं स्थानं भवति । श्रीमद्भागवतं तु साक्षादेव काव्यानां साङ्गोपाङ्गविधानां स्वरूपमेव । श्रीमद्भागवते शास्त्रचर्चापि घटनाधारितास्ति । काव्यमपि तत्र पदे-पदे वर्णनकौशल्ये दृश्यते । पूर्वोक्तेष्वध्यायेषु काव्याङ्गविषये तन्महत्त्वविषये च सोदाहरणं चर्चा विहितास्ति । अत्र विचार्यते यद् श्रीमद्भागवते यानि काव्यतत्त्वानि संश्लिष्टानि तेषामेव समीक्षणं विहितं वर्तते ।

अस्मिन् महापुराणे प्रथमस्कन्धतः द्वादशस्कन्धपर्यन्तं यत्र यत्र काव्याङ्गानां तत्त्वानां च वर्णनं प्राप्यते किन्तु पञ्चमस्कन्धे दशमस्कन्धे च काव्यतत्त्वानां समीक्षणं कर्तुं शक्यते ।

वस्तुतस्तु श्रीमद्भागवतोपरान्ते एव कृष्णाश्रयीशाखायाः समुद्भावना जाता । काव्यशास्त्रिभिरपि श्रीमद्भागवतादेव कथानां काव्यरूपाणां शैलीगुणछन्दादिविधानामवतरणं कृतम् । काव्यस्योद्भावना तु वाल्मीकिरामायणे सम्प्राप्ता । किन्तु काव्यसौष्ठवं श्रीमद्भागवदादेव सम्प्राप्यते । अत्र काव्यस्य विविधाङ्गानां निदर्शनं परिदृश्यते ।

रससंयुक्तं काव्यं भवति इति तु प्रसिद्धमेव । तत्रापि “सर्गबन्धोः महाकाव्यं महतां च महच्च यत्” अन्यतरं महाकाव्यं विद्यते । यतोहि धर्मार्थकाममोक्षप्राप्तये काव्यस्योपयोगिता अग्निपुराणे निगदिता । तथापि विश्वनाथेन स्पष्टीकृतं यत् “रामादिवत् प्रवर्तितव्यं न रावणादिवत्” इत्यादिभिः सूक्तिभिरेव पुरुषार्थप्राप्तये हेतुः । किन्तु श्रीमद्भागवतं तु भगवद्विषयकरतिभक्तियुक्तिसंसिक्तं महाकाव्यमस्ति । यदा लौकिककाव्याध्ययनादेव चतुर्वर्गफलप्राप्तिर्भवितुमर्हति । तदा श्रीमद्भागवतं महापुराणं तु अमृतरसपरिपूर्णं उपासकानां साधनं भगवल्लीलासंसिक्तं महाकाव्यं वर्तते ।

आदावन्ते अध्ययनादेवपुरुषार्थचतुष्टयसिद्धिरजायत । अनेन कारणेन श्रीमद्भागवतं शुकमुखादमृतसंयुतं रसमालयं महाकाव्यं उत्कृष्टस्वरूपं महाकाव्यं वर्तते ।

काव्यतत्त्वानां समीक्षणम्

श्रीमद्भागवतं सर्वसम्मतं महाकाव्यं कथानात्मकं काव्यरूपं वर्तते । अनेकैः विद्वद्भिः महाकाव्यस्य स्वरूपे विविधानां भावानां आकाङ्क्षाणामादर्शानां च उद्घाटनं भवति । तत्र महाकाव्येषु चत्वारि मूलतत्त्वानि एव भवन्ति –

१. उदात्तकथानकम्

२. उदात्तोद्देश्यम्

३. उदात्तचरितानि

४.उदात्तभावः औदात्तशैली च

एतानि एव महाकाव्यस्य प्राणतत्त्वानि भवन्ति ।

महाभागवतस्य उदात्तकथानकम्–

१. अस्मिन् महापुराणे इतिवृत्तं व्यापकमस्ति, विवरणात्मकमस्ति, सुसंगठितमस्ति । २. मौलिकरूपेण वैयक्तिकभावनापेक्षया सकलमानवानां भावनानां प्रतीकात्मकं कथानकं भवेत् । ३. वर्णिताभिनेतारः कथानकोचितगुणैः संसिक्ताः भवेयुः । ४. यस्य कस्यापि रसस्य प्राधान्यं भवेत् ।

श्रीमद्भागवते उक्तगुणानां युक्तं कथानकं विद्यते । अत एव श्रीमद्भागवतस्य कथातत्त्वं काव्योचितं महद्गुणोपयुक्तं विद्यते ।

उदात्तोद्देश्यम् –

महाकाव्यस्य द्वितीयं वैशिष्ट्यं उदात्तोद्देश्यं भवेत् । श्रीमद्भागवतस्य यदनुबन्धचतुष्ट्यं वर्तते तत्र अधिकारिविषयसम्बन्धप्रयोजनानि । अत्रैव महोद्देश्यं प्रयोजनं प्रयोजने संसिद्धम् । सत्यं परं धीमहि इत्यस्य व्याख्याने टीकाकारैः श्रीमद्भागवतस्य महत्प्रयोजनमुद्देश्यञ्च निगदितम् ।

उदात्तचरितानि –

श्रीमद्भागवते वंशानुचरितं चैव अत्र स्वयमेव व्यासेन उद्घोषितम् । अत्र वंशाधारितानां विविधानां घटनानां उदात्तचरित्रोद्भावना तत्र वर्णिता महर्षिणा । एकः वंशः सूर्यवंशः द्वितीयश्च चन्द्रवंशः अनयोः वंशयोः नैके उदात्तचरिताधारिताः नृपाः आसन् ।

उदात्तभावः औदात्तशैली च –

श्रीमद्भागवते वैयक्तिकभावनायाः अपेक्षया सर्वजीवजन्तूनां भावनानां प्रतीकरूपेण चित्रणं विहितम् । अत्रैव वैदिकसंस्कृतेः भारतीयसंस्कृतेश्च मौलिकं स्वरूपं विविधासु भावनासु दरीदृश्यते । अस्य प्रधानं कारणमिदमस्ति यत् भगवतः लीलापुरुषोत्तमस्य श्रीकृष्णस्य गुणानुगुणं वीरोचितगुणान् धीरोचितगुणान् भगवद्गुणान् अवर्णयत ।

वर्णनशैली दृष्ट्या च अन्यतरं महाकाव्यं भावबोधसमाधिभाषाशैली च स्वाभाविकरूपेण दृश्यते ।

एतेषां मौलिकतत्त्वानां आभ्यान्तरे काव्यतत्त्वानि भवन्ति । तत्र रसपरिपाकः, अलङ्कारसंयोजना रीतिगुणछन्दादियोजना च काव्यतत्त्वेषु स्वीकृताः ।

रसतत्त्वसमीक्षणम्

श्रीमद्भागवते भगवद्विषयकरतिः भक्तिः, अनुरक्तिश्च दृश्यते । एतत्त्रयेषु शाण्डिल्यभक्तिसूत्रानुसारेण "सा परानुरतिरीश्वरे" अनुसारेण भक्तिरसपरिपूर्णं वात्सल्यरसपरिपूर्णं श्रीकृष्णस्य अनुरक्तिः एव उत्तमा भक्तिः स्वीक्रियते –

अन्याभिलाषितशून्यं ज्ञानकर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥[१]

भारतीयकाव्यसाहित्ये प्रत्यक्षनिदर्शनरूपेण भगवद्विषयकरतिः दृश्यते । अत्र माधुर्यभावना हृदयानुरञ्जकता कोमलकान्तपदावलीद्वारा रसविधानं प्रतिफलमिति ।

[1] भक्तिरसामृतसिन्धु, पूर्वभाग प्रथमा, कारिका, ११

रसविषये काव्यशास्त्रदृष्ट्यापि अस्य महाकाव्यस्य महती उपादेयता अनुभूयते सर्वैः । यतोहि श्रीमद्भागवतोत्तरवर्तिकाव्येषु रसमाधुर्यभावना अस्माद् ग्रन्थाद् प्रभावादेव अजायत । अत्र रसाणां सौष्ठवं, भावोद्रेकः, रसः, रसभावः, रससवलता च साङ्गोपाङ्गेनाच्छादिता वर्तते । रसवर्णने नापि किमपि काव्यं सदृशमिति ।

अलङ्कारसमीक्षणम्

अलङ्काराः भूषणादिवत् भवन्ति यदा काव्यस्यात्मा रसः, अलङ्काराः कवचकुण्डादिवत् प्रसिद्धमिति । काव्ये अलङ्कारैः प्रभावोत्पादकता भवति । अनेन कारणेन वेदेषु प्रथमे ऋग्वेदेऽपि अलङ्काराणां प्रयोगः प्राप्यते । सौन्दर्यस्याभिव्यञ्जने शब्दार्थालङ्काराणामावश्यकता भवति । अलङ्काराभावे काव्ये सहृदसंवेद्यमपि न भवति । अलङ्कारः काव्यस्य कलापक्षीयधर्मः वर्तते ।

श्रीमद्भागवते स्पष्टभावावबोधने महर्षिणा विविधाः अलङ्काराः संयोजिताः । अलङ्काराणां सोदाहरणं विवेचनं पूर्वमेव संग्रथितम् । अत्र अलङ्कारतत्त्वस्य समीक्षणं विहितम् ।

श्रीमद्भागवते काव्यसौन्दर्यमलङ्कारैः सुस्पष्टं भवति । भक्तिरसपरिपूर्णमिदं महाकाव्यं स्वीक्रियते । श्रीमद्भागवते शब्दालङ्कारस्य अर्थालङ्कारस्य च चमत्कृतिर्योजना स्वाभाविकेन उद्भाव्यते । रसबोधे भावाभिबोधे च अलङ्काराणां प्रभुत्त्वं प्रचुररूपेण प्राप्यते ।

रीतिगुणछन्दसमीक्षणम्

काव्यशास्त्रे रीतिगुणछन्दादिविषये बहूक्तम् तथाप्यत्र क्रमेण समीक्ष्यते ।

रीतिसमीक्षणम् –

उपकर्तृरसादीनां इति रीतिः विश्वनाथेनोक्तम् । काव्यस्य शरीरे रीतिः उपकारिका भवति यथोक्तम् अग्निपुराणे –

अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत् ।

वपुष्य ललिते स्त्रीणां हारो भारयते परम् ॥[१]

अत्र चतस्रः रीतयः स्वीकृताः । श्रीमद्भागवते चतसृणां रीतीनां प्रयोगः विविधेषु स्थलेषु प्राप्यते । दशमस्कन्धे रासलीलाप्रसङ्गे नवोदितचन्द्रस्य वर्णनं वैदर्भीरीत्या महर्षिणा कृतम् –

प्रियः प्रियायाः इव दीर्घदर्शनः ।[२]

यत्र लघुसमासः अलङ्काराणामभावः भवति तत्र लाटीरीति उद्भाव्यते । श्रीमद्भागवते यशोदागोपीनामुपलम्भनेऽस्याः निदर्शनं भवति । अत्रापि वाक्यरचनायां स्वल्पसमासस्यास्यावस्थितिर्ज्ञायते –

नर्मदः प्रणयिणां विजहार ।[३]

श्रीमद्भागवतमहापुराणे पूर्वोक्तरीतीनां प्रयोगः प्राप्यते । यतोहि रीतिः विशेषो गुणात्मा भवति । सोप्यत्रैव विद्वद्भिः अनुभूयते ।

गुणसमीक्षणम् –

महाकाव्यस्य सौन्दर्यविधायको गुणः भवति । अग्निपुराणे –

---

[1] अग्निपुराणम् १/४६

[2] श्रीमद्भागवते १०/२९/२

[3] श्रीमद्भागवते १०/३५/२०

यः काव्ये महती छाया मनुगृहणातसौ गुणः ।[1]

अनेन ज्ञायते यत् केवलं दोषाभावः न गुणः । गुणानपि काव्यशोभायाः कर्तारो धर्माः स्वीक्रियन्ते । श्रीमद्भागवते प्रायेण दशमस्कन्धे समेषां गुणानां समाहारः सम्प्राप्तः । भागवतकारेण आदितः द्वादशस्कन्धपर्यन्तं विविधोक्तानां गुणानां वर्णनं कृतमिति । गुणानां समावेशेन श्रीमद्भागवतस्य शब्दार्थचमत्कारयोजना रसयोजना च प्रभावोत्पादनी भवति ।

छन्दसमीक्षणम् –

संस्कृतवाङ्मये यानि काव्यानि सन्ति तेषु छन्दयोजना महत्त्वपूर्णस्थानं काव्यतत्त्वरूपेण स्वीक्रियते । श्रीमद्भागवते रामायणे च यानि छन्दांसि समादृतानि तेषां छन्दसामेव तदुत्तरवर्तिकविभिः अनुकृतम् । श्रीमद्भागवतन्तु छन्दसामर्णवोऽस्ति । यत्र लोके प्रसिद्धछन्दसां निदर्शनं भवति । भागवतकारेण अनेकविधछन्दसां प्रयोगः कथानुसारेण. वर्णनानुसारेण, प्रसङ्गानुसारेण, उक्त्यानुसारेण च स्वीकृतः । लोके यानि छन्दांसि लक्षणानि प्रसिद्धानि सन्ति तेषां समेषां छन्दसामुदाहरणानि श्रीमद्भागवते प्राप्तानि भवन्ति । इदमेव श्रीमद्भागवतमहापुराणं एतादृशं महाकाव्यं जगति प्रसिद्धमस्ति । यत्र समेषां शास्त्राणां काव्यानाञ्चोदाहरणं सर्वसुलभमस्ति । काव्यस्य समस्ताङ्गान्युपाङ्गानि च संनिहितानि तदपि काव्यस्य समस्तकाव्यतत्त्वानां रहस्यानामङ्गोपकरणानाञ्च सन्निधानं श्रीमद्भागवते विद्यते ।

———————————————

[1] अग्निपुराणम् ३४६/